श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे

# ॥ द्वाविंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ द्वाविंशः सर्गः ॥

## राज्ञा स्वस्त्ययनपूर्वकं रामलक्ष्मणयोर्मुनिना सह प्रस्थापनं मार्गे तयोर्विश्वामित्राद् बलातिबलाख्यविद्ययोः प्राप्तिश्च

तथा वसिष्ठे ब्रुवति राजा दशरथः स्वयम्।
प्रहृष्टवदनो राममाजुहाव सलक्ष्मणम्॥ **1.22.1** ॥

कृतस्वस्त्ययनं मात्रा पित्रा दशरथेन च।
पुरोधसा वसिष्ठेन मङ्गलैरभिमन्त्रितम्॥ **1.22.2** ॥

स पुत्रं मूर्ध्न्युपाघ्राय राजा दशरथस्तदा।
ददौ कुशिकपुत्राय सुप्रीतेनान्तरात्मना॥ **1.22.3** ॥

ततो वायुः सुखस्पर्शो नीरजस्को ववौ तदा।
विश्वामित्रगतं रामं दृष्ट्वा राजीवलोचनम्॥ **1.22.4** ॥

पुष्पवृष्टिर्महत्यासीद् देवदुन्दुभिनिःस्वनैः।
शङ्खदुन्दुभिनिर्घोषः प्रयाते तु महात्मनि॥ **1.22.5** ॥

विश्वामित्रो ययावग्रे ततो रामो महायशाः।
काकपक्षधरो धन्वी तं च सौमित्रिरन्वगात्॥ **1.22.6** ॥

कलापिनौ धनुष्पाणी शोभयानौ दिशो दश।
विश्वामित्रं महात्मानं त्रिशीर्षाविव पन्नगौ॥ **1.22.7** ॥

अनुजग्मतुरक्षुद्रौ पितामहमिवाश्विनौ।
अनुयातौ श्रिया दीप्तौ शोभयन्तावनिन्दितौ॥ **1.22.8** ॥

तदा कुशिकपुत्रं तु धनुष्पाणी स्वलङ्कृतौ।
बद्धगोधाङ्गुलित्राणौ खड्गवन्तौ महाद्युती॥ **1.22.9** ॥

कुमारौ चारुवपुषौ भ्रातरौ रामलक्ष्मणौ।
अनुयातौ श्रिया दीप्तौ शोभयेतामनिन्दितौ।
स्थाणुं देवमिवाचिन्त्यं कुमाराविव पावकी॥ **1.22.10** ॥

अध्यर्धयोजनं गत्वा सरय्वा दक्षिणे तटे।
रामेति मधुरां वाणीं विश्वामित्रोऽभ्यभाषत॥ **1.22.11** ॥

गृहाण वत्स सलिलं मा भूत् कालस्य पर्ययः।
मन्त्रग्रामं गृहाण त्वं बलामतिबलां तथा॥ **1.22.12** ॥

न श्रमो न ज्वरो वा ते न रूपस्य विपर्ययः।
न च सुप्तं प्रमत्तं वा धर्षयिष्यन्ति नैर्ऋताः॥ **1.22.13** ॥

न बाह्वोः सदृशो वीर्ये पृथिव्यामस्ति कश्चन।
त्रिषु लोकेषु वा राम न भवेत् सदृशस्तव॥ **1.22.14** ॥

बलामतिबलां चैव पठतस्तात राघव।
न सौभाग्ये न दाक्षिण्ये न ज्ञाने बुद्धिनिश्चये।
नोत्तरे प्रतिवक्तव्ये समो लोके तवानघ॥ **1.22.15** ॥

एतद्विद्याद्वये लब्धे न भवेत् सदृशस्तव।
बला चातिबला चैव सर्वज्ञानस्य मातरौ॥ **1.22.16** ॥

क्षुत्पिपासे न ते राम भविष्येते नरोत्तम।
बलामतिबलां चैव पठतस्तात राघव॥ **1.22.17** ॥

गृहाण सर्वलोकस्य गुप्तये रघुनन्दन।
विद्याद्वयमधीयाने यशश्चाथ भवेद् भुवि॥ **1.22.18** ॥

पितामहसुते ह्येते विद्ये तेजःसमन्विते।
प्रदातुं तव काकुत्स्थ सदृशस्त्वं हि पार्थिव॥ **1.22.19** ॥

कामं बहुगुणाः सर्वे त्वय्येते नात्र संशयः।
तपसा सम्भृते चैते बहुरूपे भविष्यतः॥ **1.22.20** ॥

ततो रामो जलं स्पृष्ट्वा प्रहृष्टवदनः शुचिः।
प्रतिजग्राह ते विद्ये महर्षेर्भावितात्मनः॥ **1.22.21** ॥

विद्यासमुदितो रामः शुशुभे भीमविक्रमः।
सहस्ररश्मिर्भगवाञ्शरदीव दिवाकरः॥ **1.22.22** ॥

गुरुकार्याणि सर्वाणि नियुज्य कुशिकात्मजे।
ऊषुस्तां रजनीं तत्र सरय्वां ससुखं त्रयः॥ **1.22.23** ॥

दशरथनृपसूनुसत्तमाभ्यां
  तृणशयनेऽनुचिते तदोषिताभ्याम्।
कुशिकसुतवचोऽनुलालिताभ्यां
  सुखमिव सा विबभौ विभावरी च॥ **1.22.24** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे द्वाविंशः सर्गः॥